# Shri Mukundashtakam

# શ્રીમુકુન્દાષ્ટકમ્

## Document Information

Text title : mukundAShTakam

File name : mukundAShTakam.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, aShTaka, vishnu

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# Shri Mukundashtakam

# શ્રીમુકુન્દાષ્ટકમ્

શ્રીમુકુન્દાય નમઃ ।

બલભિદુપલકાન્તિદ્રોહિણિ શ્રીમદઙ્ગે
    ઘુસૃણરસવિલાસૈઃ સુષ્ઠુ ગાન્ધર્વિકાયાઃ ।
સ્વમદનનૃપશોભાં વર્ધયન્ દેહરાજ્યે
    પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૧॥

ઉદિતવિધુપરાર્ધજ્યોતિરુલ્લઙ્ઘિવક્ત્રો
    નવતરુણિમરજ્યદ્બાલ્યશેષાતિરમ્યઃ ।
પરિષદિ લલિતાલીં દોલયન્ કુણ્ડલાભ્યાં
    પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૨॥

કનકનિવહશોભાનન્દિ પીતં નિતમ્બે
    તદુપરિ નવરક્તં વસ્ત્રમિત્થં દધાનઃ ।
પ્રિયમિવ કિલ વર્ણં રાગયુક્તં પ્રિયાયાઃ
    પ્રણયતુ મમ નેત્રાભીષ્ટપૂર્તિં મુકુન્દઃ ॥ ૩॥

સુરભિકુસુમવૃન્દૈર્વાસિતામ્ભઃસમૃદ્ધે
    પ્રિયસરસિ નિદાઘે સાયમાલીપરીતામ્ ।
મદનજનકસેકૈઃ ખેલયન્ન્ એવ રાધાં
    પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૪॥

પરમલમિહ લબ્ધ્વા હન્ત ગાન્ધર્વિકાયાઃ
    પુલકિતતનુરુચ્ચૈરુન્મદસ્તત્ક્ષણેન ।
નિખિલવિપિનદેશાન્ વાસિતાન્ એવ જિઘ્રન્
    પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૫॥

પ્રણિહિતભુજદણ્ડઃ સ્કન્ધદેશે વરાઙ્ગ્યાઃ
    સ્મિતવિકસિતગણ્ડે કીર્તિદાકન્યકાયાઃ ।
મનસિજજનિસૌખ્યં ચુમ્બનેનૈવ તન્વન્

પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૬॥

પ્રમદદનુજગોષ્ઠ્યાઃ કોઽપિ સંવર્તવહ્નિ-
વ્ર્રજભુવિ કિલ પિત્રોર્મૂર્તિમાન્ સ્નેહપુઞ્જઃ ।
પ્રથમરસમહેન્દ્રઃ શ્યામલો રાધિકાયાઃ
પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૭॥

સ્વકદનકથયાઙ્ગીકૃત્ય મૃદ્વીં વિશાખાં
કૃતચટુ લલિતાં તુ પ્રાર્થન્ પ્રૌઢશીલામ્ ।
પ્રણયવિધુરરાધામાનવિધ્વંસનાય
પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૮॥

પરિપઠતિ મુકુન્દસ્યાષ્ટકં કાકુભિર્યઃ
સકલવિષયસઙ્ગાત્ સન્નિયમ્યેન્દ્રિયાણિ ।
વ્રજનવયુવરાજો દર્શયન્ સ્વં સરાધે
સ્વજનગણનમધ્યે તં પ્રિયાયાસ્તનોતિ ॥ ૯॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીમુકુન્દાષ્ટકં સમાપ્તમ્ ।

*Shri Mukundashtakam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*